National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(66): 98-100
© 2026 NJHSR
www.sanskritarticle.com

**R V Phaniram**
Research Scholar,
Sri Venkateswara Vedic-
University, Tirupati

**Correspondence:**
**R V Phaniram**
Research Scholar,
Sri Venkateswara Vedic-
University, Tirupati

# प्रतिष्ठारहस्यम् – श्रुत्यागमसमन्वयविचारः

**R V Phaniram**

## उपोद्घातः

भारतीयसनातनधर्मे विग्रहाराधनाया अत्युच्चं स्थानं विद्यते। चरमपुरुषार्थसाधनार्थं मानवः नानाविधान् मार्गान् अनुसरति। तेषु आलयाराधना विशेषमहत्त्वं वहति। आलये प्रतिष्ठापनीयस्य विग्रहस्य दैवसन्निध्यसम्पादनार्थं यः शास्त्रोक्तः अक्ष्युन्मेषन – अधिवास –स्थापन – आवाहनादिक्रियासमूहः विधीयते, सः "प्रतिष्ठा" इति उच्यते। सर्वत्रव्यापकस्य परब्रह्मणः अधिवास – आवाहन – होम – मन्त्रादिक्रियाभिः साकाररूपेण विग्रहे सान्निध्यसम्पादनमेव **प्रतिष्ठायाः** प्रमुखलक्ष्यम्। प्रतिष्ठा विना विग्रहः केवलं शिलारूपं वा लोहरूपं वा भवति, प्रतिष्ठानन्तरं तु सः चैतन्यसमन्वितः अर्चामूर्तिरूपेण परिवर्तते।

सनातनधर्मे द्वौ प्रमुखौ प्रवाहौ स्पष्टतया दृश्येते।

(१) वेदान्ताः (उपनिषदः) — परमार्थतत्त्वप्रतिपादकाः

(२) आगमाः — तस्य तत्त्वस्य आचरणात्मकप्रकाशकाः

अयं शोधप्रबन्धः उपनिषत्सु प्रत्यक्षरूपेण प्रतिष्ठाविधानस्य अनुल्लेखेऽपि, तत्र निहितानि तात्त्विकमूलानि यथा प्रतिकोपासना, सगुणब्रह्मध्यानम्, प्राणतत्त्वविचारः, हृदयनिवासब्रह्मभावना - विस्तृतरूपेण विद्यन्ते इति परीक्षते। अनन्तं निराकारं च परब्रह्म सामान्यः मानवः स्वस्य सीमितेन मनसा कथं उपासीत? अस्य मूलप्रश्नस्य श्रुतिः यत् समाधानं प्रदत्तवती, तत् "प्रतीकोपासना" इति, या सगुणोपासना इत्यपि उच्यते। एषा उपासनापद्धतिः यथाविधानं यत्र विस्तरेण निरूपिता, तत् छान्दोग्योपनिषत्। एवमेव एतत्तत्त्वं कालक्रमेण आगमसम्प्रदाये विग्रहाराधनरूपेण तथा जीवकलान्यसपूर्वकप्रतिष्ठाविधानरूपेण विकसितम्। अतः प्रतिष्ठाविज्ञानस्य तात्त्विकमूलरूपेण छान्दोग्योपनिषद् प्रामाणिकं आधारग्रन्थत्वेन स्वीक्रियते।

श्रुत्यागमसमन्वयदृष्ट्या प्रतिष्ठाविज्ञानस्य सम्यगवगमनम् अस्य शोधकार्यस्य प्रधानलक्ष्यम्।

## प्रतीकोपासनाया (सगुणोपासनायाः) उपनिषदाधारः

छान्दोग्योपनिषदि प्रतिपादितां प्रतीकोपासनां यदा सूक्ष्मतया विचारयामः, तदा प्रणवरूपेण निर्दिष्टे शब्दब्रह्मणि एव मूर्त्याराधनायाः गुह्यं तात्त्विकमूलं निहितमिति सुस्पष्टं भवति। **"ओम् इत्येतदक्षरम् उद्गीथमुपासीत"**[1] इति वाक्येन ओङ्कारस्य उपासनाविषयत्वं निर्दिष्टम्। अत्र ओङ्कारः केवलो ध्वनिरिति न, किन्तु परब्रह्मणः संक्षिप्तः चैतन्यमयः अभिव्यक्तिरूपः।

**नारायणोपनिषदि - "प्रत्यगानन्दम् ब्रह्मपुरुषं प्रणवस्वरूपम् अकार उकार मकार इति"**[2] - प्रणवस्य नारायणस्वरूपत्वं निरूपितम्। अतः शब्दरूपेण ज्ञायमानः प्रणवः एव सगुणब्रह्मणः प्रत्यक्षप्रतिनिधिः। शब्ददेवता–रूपयोः मध्ये न कश्चिद्विरोधः, किन्तु तयोः तात्त्विकाभेद एव।

शब्द – नाम – अर्थ – रूपाणां परस्परान्वितत्वं शास्त्रेषु प्रसिद्धम्। शब्दः अर्थवाचकः; स अर्थः अनुभवगम्यतया नामरूपात्मकः भवति।

"नामरूपे व्याकरवाणि" इति उपनिषद्वाक्येन एषः सिद्धान्तः प्रतिपादितः। शब्दात् नाम, नाम्नः भावः, भावात् ध्यानरूपस्थितिः, ततः रूपसम्बन्धः इति क्रमः।

अतः शब्दात् साक्षात् मूर्तिः जायते इति न युक्तम्; मध्ये ध्यानरूपा भावस्थितिः अनिवार्या। प्रणवः नारायणतत्त्वं बोधयति, तत् तत्त्वं ध्यानरूपेण चित्ते अवभासते, स एव भावः स्थिरीभूय रूपरूपेण अभिव्यज्यते।

एषः स्थिरीकृतभावः एव मूर्तिरूपेण प्रतिष्ठाप्यते। तस्मात् विग्रहः न जडमात्रं, किन्तु मन्त्रशक्त्या, ध्यानसम्पत्त्या, शास्त्रोक्तक्रियाभिः चैतन्येन आवाहितः सान्निध्यविशेषः। अत्र प्रतिष्ठा अत्यन्तं महत्त्ववती। यतः प्रतिष्ठायां शब्दब्रह्म मन्त्ररूपेण आवाह्य, नामरूपात्मकतया मूर्तौ संस्थाप्यते। एष एव श्रुत्यागमसमन्वयस्य सारः। श्रुतयः शब्दरूपेण उपासनां निर्दिशन्ति, आगमाः तदेव तत्त्वं रूपरूपेण संस्थाप्य लोकानुग्रहार्थं व्यवहरन्ति। अतः विग्रहाराधना न श्रुतिविरुद्धा; किन्तु श्रुतितत्त्वस्य व्यवहारात्मकः विकासः इति निष्कर्षः।

**<u>प्रतिष्ठातत्त्वस्य उपनिषद्विवेचनम्</u>**

एवं शब्द–नाम–भाव–रूपपरिणामक्रमेण सगुणब्रह्मस्वरूपं साधकचित्ते प्रतिष्ठाय, विग्रहरूपेणावतरणं सिद्धमिति निरूपितम्। अत्र तु कश्चित् मुख्यः प्रश्नः स्वयमेव उदेति - किमिदं रूपं केवलं भावमात्ररूपेणैव तिष्ठेत्? उत तस्मिन् परमतत्त्वस्य सान्निध्यस्थापनाय कश्चित् शास्त्रोक्तः विधिः अस्ति? अस्य प्रश्नस्य समाधानं छान्दोग्योपनिषदि निगूढतया प्रतिपादिते प्रतिष्ठातत्त्वे एव लभ्यते।

छान्दोग्योपनिषदि **"यो ह वै प्रतिष्ठां वेद प्रति ह तिष्ठत्यस्मिंश्च लोकेऽमुष्मिंश्च चक्षुर्वाव प्रतिष्ठा"**[3] इत्यत्र चक्षुषः अपि आधारतत्त्वरूपेण 'प्रतिष्ठा' इति निर्देशः क्रियते। अत्र "प्रतिष्ठा" इति पदं केवलं स्थैर्यार्थकं न, अपि तु जीवचैतन्यस्य आधारभूतं तत्त्वमिति बोधयति।

अस्य भावस्य आगमसम्प्रदायेन सह समन्वये सति, यावत् विग्रहः केवलं शिलामात्रं भवति, तावत् स जडस्वरूप एव; किन्तु प्राणतत्त्वसंयोगे सति स एव चैतन्यमयः, देवतासान्निध्यविशेषभाजनं भवतीति स्पष्टं भवति। एवं च उपनिषत्सु निरूपितं चैतन्याधाररूपं प्रतिष्ठातत्त्वम् आगमेषु "प्राणप्रतिष्ठा" इति क्रियारूपेण व्यवह्रियते। एष एव भावः अन्यस्मिन्नपि स्तरि छान्दोग्योपनिषदि दहरविद्यायां सुस्पष्टं दृश्यते **"अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुंडरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तमस्मिन् यदन्तस्तदन्वेष्टव्यं तद् वाव विजिज्ञासितव्यमस्ति"**[4] इत्युक्त्या हृदयपुण्डरीकं परमतत्त्वनिवास-स्थानत्वेन प्रतिपादितम्। अत्र हृदयमेव देवसान्निध्यस्य आन्तरिकमायतनम्। अस्य भावस्य बाह्याराधनायामन्वये हृदयम् आन्तरगर्भगृहम् इव, देवालयस्य गर्भगृहम् तस्यैव बाह्यप्रतिरूपम्। तस्मात् विग्रहस्य गर्भगृहे प्रतिष्ठापनं न कदापि यादृच्छिकम्, किन्तु उपनिषत्प्रतिपादितस्य हृदयस्थितब्रह्मतत्त्वस्य बाह्याभिव्यक्तिरूपम्। एवं च छान्दोग्योपनिषदि उक्तं **"सर्वं खल्विदं ब्रह्म"**[5] तथा "तज्जलानिति" सिद्धान्तः समस्तं जगत् ब्रह्मस्वरूपमेव इति प्रतिपादयतः। अस्मिन् दृष्टिकोणे विग्रहः अपि ब्रह्मस्वरूप एव; किन्तु साधकानां अनुभवसौकर्यार्थं स विशिष्टे केन्द्रीकृतरूपे अवतारितः। एतेषां सर्वेषां तत्त्वानां समन्वये सति निष्कर्षः स्पष्टो भवति - उपनिषदः "प्रतिष्ठा" इति शब्देन प्राणरूपं जीवनाधारतत्त्वं निरूपयन्ति, आगमसम्प्रदायस्तु तदेव तत्त्वं मन्त्र – क्रिया – ध्यानसमन्वयेन विग्रहे चैतन्यरूपेण संस्थापयति।

**<u>वैखानसागमेषु प्रतिष्ठातत्त्वस्य व्यवहारात्मकप्रकाशः</u>**

अस्य तात्त्विकस्य सिद्धान्तस्य आगमेषु प्रत्यक्षो व्यवहारात्मकः विस्तारः सुस्पष्टं दृश्यते। विशेषतः वैखानससम्प्रदाये भगवतः श्रीमन्नारायणस्य परदैवतत्वं, तस्य अर्चावताररूपेण प्रतिष्ठापनं च अत्यन्तं विशदतया निरूपितम्।

श्रीवैखानसकल्पसूत्रस्य चतुर्थप्रश्ने दशमखण्डे **"अथाग्नौ नित्यहोमान्ते विष्णोर्नित्यार्चा सर्वदेवार्चा भवति। अग्निर्वै देवानामवमो विष्णुः परमः। तदन्तरेण सर्वा अन्याः देवताः इति ब्राह्मणम्। तस्मात् परं विष्णुं प्रतिष्ठाप्य..."**[6] इति वचनैः विष्णोः परमदैवतत्वं तथा तस्य प्रतिष्ठापूर्वकार्चनस्य शास्त्रीयत्वं प्रतिपादितम्। अत्र "विष्णोर्नित्यार्चा सर्वदेवार्चा भवति" इत्यनेन, श्रीविष्णवर्चनमेव सर्वदेवतामयाराधनरूपमिति सिद्ध्यति। पुनः "तस्मात् परं विष्णुं प्रतिष्ठाप्य" इति विधिवाक्येन सगुणब्रह्मणः विग्रहरूपप्रतिष्ठा न केवलं अनुमता, अपि तु शास्त्रविहिता इति सुस्पष्टं भवति। तथैव मरीचिमहर्षिप्रणीतायाम् आनन्दसंहितायाम् अपि विष्णुपारम्यं शब्दब्रह्मस्वरूपत्वेन निरूपितम्।

**ऋतमेवाक्षरं ब्रह्म सदसच्चोपकारकम्।**
**तदोङ्कारमयं नित्यं अनन्तं निष्कलं परम्॥**
**अनन्तानन्दचैतन्यं तेजोरूपमरूपवत्।**
**सर्पिर्वत्सर्वगं क्षीरे अरण्योरनलवत्स्थितम्॥**
**खं वाय्वर्चः परं ज्ञानदीपप्रकाशकम्।**
**आराध्यो निखिलाधारः पुराणपुरुषोत्तमः॥**[7]

इति श्लोकैः प्रणवब्रह्मणः नारायणस्वरूपत्वं, तस्य अनन्त-चैतन्यमयत्वं, सर्वव्यापकत्वं, आराध्यत्वं च निरूपितम्। अयं एव उपनिषदुक्तशब्दब्रह्मतत्त्वस्य आगमिकव्यवहाररूपविस्तारः इति वक्तुं शक्यते।

पुनश्च वैखानससूत्रेषु धर्मप्रश्ने अष्टमखण्डे **सगुणे ब्रह्मणि बुद्धिं निवेश्य पश्चान्निर्गुणं ब्रह्माश्रित्य मोक्षे यत्नं कुर्यात्**[8] इति वचनात् सगुणोपासनाया एव निर्गुणब्रह्मप्राप्तेः साधनत्वं प्रतिपाद्यते। तदेव

तैत्तिरीयोपनिषदि ब्रह्मानन्दवल्ल्यां **"यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते"**[9] इति वाक्येन निरूपितम्। अत्र "प्रतिष्ठा" इति पदेन परब्रह्मणि निश्चलचैतन्यरूपा परमा स्थितिः बोध्यते। यत् ब्रह्म अदृश्यं, अनिर्वचनीयं, निराधारं च, तस्मिन्नेव अभयरूपा परमा प्रतिष्ठा साधकस्य सिद्ध्यति।

अतः विग्रहाराधना न केवलम् ऐहिकफलसाधनम्, अपि तु आमुष्मिकफलप्राप्तेः अप्यनिवार्योपायः इति वैखानससम्प्रदायस्य सिद्धान्तः सुस्पष्टो भवति।

**<u>उपसंहारः</u>**

एवं सम्यगवलोक्य श्रुत्यागमसमन्वयः प्रतिष्ठारहस्यरूपेण सुस्पष्टो भवति। उपनिषदः यद्यपि प्रत्यक्षतया विग्रहप्रतिष्ठाविधानं न निरूपयन्ति, तथापि तस्य मूलतत्त्वानि निगूढरूपेण प्रतिपादयन्ति। प्रणवोपासनया शब्दब्रह्मतत्त्वं निर्दिश्य, नाम – भाव – रूपपरिणामक्रमं सूचयित्वा, दहरविद्यया अन्तःस्थितब्रह्मणः निवासं बोधयित्वा प्रतिष्ठाशब्देन व्यापकचैतन्याधारतत्त्वं निरूपितम् इत्यादिवाक्यैः जीवचैतन्याधारतत्त्वं प्रतिष्ठारूपेण निरूपितम्। एतानि सर्वाणि तत्त्वानि आगमसम्प्रदायः मन्त्र–ध्यान–क्रिया-समन्वयेन व्यवहाररूपेण विकसित्य, विग्रहे देवताचैतन्यस्थापन-रूपेण "प्राणप्रतिष्ठा" इति व्यवहृतवान्। तस्मात् प्रतिष्ठा न केवलं शिलायां देवताप्रवेशनक्रिया, किन्तु सा श्रुतिप्रतिपादितशब्दब्रह्म – नामरूप – प्राणचैतन्यतत्त्वानां समग्राविर्भावः।

अतः विग्रहाराधना न श्रुतिविरुद्धा, अपि तु श्रुत्यन्तर्निहितो-पासनामार्गस्य व्यवहारात्मकः विकासः इति निश्चितम्। अन्ते वदितव्यं यत् निराकारब्रह्मतत्त्वं बोधुं अशक्तस्य साधकस्य कृते, श्रुतिप्रतिपादिता प्रतीकोपासना एव आगमेषु विस्तृत्य प्रतिष्ठितविग्रहाराधनरूपेण लोकानुग्रहार्थं व्यवस्थिताभवत्। अतः

**श्रुतिः तत्त्वं बोधयति, आगमः तदेव आचरति। अत एव प्रतिष्ठाशब्दः उपनिषद्सु न केवलं स्थैर्यार्थकः, किन्तु व्यापकचैतन्याधारतत्त्वस्य द्योतकः इति निष्कर्षः।**

**<u>सन्दर्भ :</u>**


[1]छान्दोग्योपनिषत् – प्रथम खण्डः, प्रथम मन्त्रः

[2]नारायणोपनिषत् – चतुर्थ अनुवाकः

[3]छान्दोग्योपनिषत् – 5 अध्यायः, 1 खण्डः, 3 मन्त्रः

[4]छान्दोग्योपनिषत् – 8 आध्यायः,1 खण्डः, 1 मन्त्रः

[5]छान्दोग्योपनिषत् – 3 अध्यायः,14 खण्डः, 1 मन्त्रः

[6]श्रीवैखानसकल्पसूत्रम् – 4 प्रश्नः, 10 खण्डः

[7]आनन्दसंहिता – 1 अध्यायः, 24-25-26 श्लोकाः

[8]श्रीवैखानसकल्पसूत्रम् – धर्मप्रश्नः, 8 खण्डः

[9]तैत्तिरीयोपनिषदि ब्रह्मानन्दवल्ली – 7 अनुवाकः